नामांक Roll No.

**Sl.No. :**

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

**No. of Questions – 30**

**No. of Printed Pages – 07**

**VU–87–Sahit. Shas.**

# वरिष्ठ उपाध्याय परीक्षा, 2019

## साहित्य – शास्त्रम्

**समय** : 3¼ होराः

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभि : सर्वप्रथमं स्वप्रश्नपत्रे निर्धारित स्थाने नामांकः अनिवार्यतो लेखनीयः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तर पुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।

5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) 'प्रस्तुताप्रस्तुतानां च तुल्यत्वे' कोऽलंकारो भवति? [1]

2) अर्थान्तरन्यासालंकारस्य लक्षणं लिखत। [1]

3) संलक्ष्यक्रमव्यङ् ग्यध्वनिः कतिविधो भवति? [1]

4) व्यञ्जनात्मको व्यापारः कीदृशो भवति? [1]

5) प्रयोजनभेदेन लक्षणा कतिधा? [1]

6) अभिधेयार्थः कस्यां वृत्त्यां भवति? [1]

7) यक्षः कुत्र वसतिं चक्रे? [1]

8) वल्मीकाग्रात् कस्य धनुः खण्डं प्रभवति? [1]

9) रामः अरण्ये कस्य श्राद्धकर्म कर्त्तुमिच्छति स्म? [1]

10) महाकविभासकृत प्रतिमानाटकस्य नायिका का? [1]

11) परूषावृत्तिं सोदाहरणं विवेचयत। [2]

12) वैदर्भी – रीतिं वर्णयत। [2]

13) अगूढ़गुणीभूत व्यङ्ग्यं सोदाहरणं विवेचयत। [2]

14) अभिधावृत्तेः भेदानाम् उदाहरणानि लिखत। [2]

15) आम्रकूटपर्वतस्य वैशिष्ट्यं मेघदूतानुसारं लिखत। [2]

16) उज्जयिनीवर्णनं स्वशब्देषु प्रतिपादनीयम्। [2]

17) प्रतिमानाटकस्य रचयिता कः? तस्य नाटकानां नामानि लिखत। [2]

18) ''अनुचरति शशाङ्कं राहुदोषेऽपि ताराः'' इति सूक्तेः सप्रसङ्गो भावार्थो लेखनीयः। [1+1=2]

19) अधोलिखितालंकारयुग्मेषु कयोश्चिद् द्वयोः परस्परं भेदः प्रदर्शनीयः – [2+2=4]

क) विभावना – विशेषोक्ति

ख) दृष्टान्तः – निदर्शना

ग) उदात्तम् – प्रतीपम्

20) अधोलिखितेषु द्वयोरूदाहरणयोः अलंकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिर्विधेया – [2+2=4]

क) 'तापेन भ्राजते सूर्यः शूरश्चापेन राजते'।

ख) 'अयमैन्द्री मुखं पश्य रक्तश्चुम्बति चन्द्रमा'।

ग) मुञ्च मानं दिनं प्राप्तं मन्द नन्दी हरान्तिके'।

21) वक्तृस्यूतव्यङ्ग्यस्य भेदचतुष्ट्यं प्रतिपादयत। [1×4=4]

22) मतान्तरेण प्रयोजनवतीलक्षणा कतिविधा? सोदाहरणं लिखत। [4]

23) अपराङ्ग गुणीभूतव्यङ्ग्यं तुल्यप्राधान्यगुणीभूतव्यङ्ग्यञ्च सोदाहरणं विवेचयत। [4]

24) महाकविकालिदासस्य परिचयं विलिख्य तस्य रचनानामानि लिखत। [4]

25) अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सप्रसङ्गो भावार्थो लेखनीयः [1+3=4]

क) जातं वंशे भुवनविदिते पुष्कराऽवर्तकानां

जानामि त्वां प्रकृतिपुरूषं कामरूपं मघोनः।

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

ख) प्राप्यावन्तीनुदयनकथा कोविद ग्रामवृद्धान्,

पूर्वोद्दिष्टामुपसर पुरीं श्री विशालां विशालाम्।

स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां,

शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम्।।

26) प्रतिमानाटकस्य प्रथमाङ्कस्य कथासारो लेखनीयः। [4]

27) अधोलिखित पद्ययोः कस्यचिदेकस्य छन्दः परिचीय तल्लक्षणं लेखनीयम्। लक्षणोदाहरणयोः संगतिश्च प्रदर्शनीया – [2+2=4]

क) शत्रुघ्नलक्ष्मण गृहीत घटेऽभिषेके

छत्रे स्वयं नृपतिना रूदता गृहीते।

सम्भ्रान्त्या किमपि मन्थरयाचकर्णे

राज्ञः शनैरभिहितं चन चास्मि राजा।।

ख) वयमयशसा चीरेणार्यो नृपो गृहमृत्युना

प्रततरूदितैः कृत्स्नाऽयोध्या मृगैः सह लक्ष्मणः।

दयित तनयाः शोकेनाम्बाः सुषाध्वपरिश्रमै –

र्धिगिति वचसा चोग्रेणात्मा त्वया ननु योजितः।।

**28)** श्रृंगाररसस्वरूपं विविच्य तदुदाहरणमपि लेखनीयम्। **[4+2=6]**

अथवा

भयानकरसस्य स्वरूपं प्रदर्श्य तदुदाहरणमपि लेखनीयम्।

**29)** अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया – **[1+1+1+3=6]**

क) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो –

रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।

मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः,

कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।

ख) अद्रेः श्रृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि –

र्दृष्टोत्साहश्चकित चकितं मुग्धासिद्धाङ्गनाभिः।

स्थानादस्मात्सरस निचुलादुत्पतोदङ् मुखः खं

दिङ्नागानां पथि परिहरन् स्थूल हस्तावलेपान्।।

**30)** अधोलिखितपद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया – **[1+1+1+3=6]**

क) वनगमननिवृत्तिः पार्थिवस्यैव ताव–

न्मम पितृपरवत्ता बालभावः स एव।

नवनृपतिविमर्शे नास्ति शङ्का प्रजाना –

मथ च न परिभोगैर्वञ्चिता भ्रातरो मे।।

ख) वयमयशसा चीरेणार्यो नृपो गृहमृत्युना

प्रततरूदितैः कृत्स्त्रडयोध्यामृगैः सह लक्ष्मणः।

दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमै –

र्धिगिति वचसा चोग्रेणात्मा त्वया ननु योजितः।।

✈ ✈ ✈

DO NOT WRITE ANYTHING HERE